# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०३ सेमेस्टर-०५** | **प्रश्नपत्रम्- ०५** | गुणाः - ७० |
| विषयः– रामानुजवेदान्तः | कोड – CC359 | समयः – १० :०० तः ०१:०० |
| दिनाङ्कः – ०८/१२/२०१८ | ग्रन्थः –श्रीमद्भगवद्गीता सप्तमतः नवमाध्यायपर्यन्तम् | |

Unit-1

**प्रश्नः १ अधस्तनश्लोकेषु द्वयोः यथाग्रन्थं व्याख्यात्मकमुत्तरं लिखत |** १०

(१) भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च|
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ||

(२) दैवी ह्येषा गुणमयी मम माया दुरत्यया|
मामेव ये प्रापद्यन्ते मायामेतां तरन्ति ते||

(३) नाहं प्रकाशं सर्वस्य योगमायासमावृतः|
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्||

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकमुत्तरं यथाग्रथं लिखत |** १०

(१) शरणागत्यर्हाश्चतुर्विधाः जनाः यथाभाष्यं प्रतिपाद्यन्ताम् |

(२) सप्तमाध्यायस्य साराशं लिखत|

Unit-2

**प्रश्नः ३ अधस्तनप्रश्नेषु द्वयोरुत्तरं यथाग्रन्थं लिखत|** १०

(१) कैवल्यार्थिनां स्मरणप्रकारं प्रतिपादयत|

(२) ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारञ्च निरूपयत|

(३) कैवल्यप्राप्तानां पुरुषाणामपि पुनरावृत्तिः न विद्यते इति यथाग्रन्थं संसाधयत|

**प्रश्नः ४ कस्यचिदेकस्य प्रश्नस्य सव्याख्यानमुत्तरं यथाग्रन्थं लिखत |** १०

(१) अर्जुनकृतप्रश्नानामुत्तरं श्रीभगवता प्रत्ते अमष्टमेऽध्याये यथाग्रन्थं विवेच्यत|

(२) अष्टमाधयायस्य सारतत्त्वं प्रतिपादयत|

Unit-3

**प्रश्नः ५ अधस्तनश्लोकेषु द्वयोः व्याख्यानं यथाग्रन्थं लिखत|** १०

(१) मया ततमिदं सर्वं जगदव्यक्तमूर्तिना|
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः||

(२) ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते|
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्||

(३) पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति|
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ||

**प्रश्नः ६ अधस्तनयोः प्रश्नयोः कस्याप्येकस्य प्रश्नस्योत्तरं सविशदं यथाग्रन्थं च लिखत।** **१०**

(१) भगवतो माहात्म्यं प्रतिपाद्य एकान्तिकभक्तियोगः विविच्यताम्।

(२) भगवदनुभवैकभोगानां महात्मनां ज्ञानिनां स्वभावं तञ्च प्रतिपादयत।

**प्रश्नः ७ अधस्तनप्रश्नेषु केषाञ्चित् प्रश्नानां दशामेवोत्तरं यथाग्रन्थं लिखत।** **१०**

(१) सप्तमाध्यायस्य किन्नामधेयम् ?

(२) जीवरूपा का प्रकृतिः ?

(३) कस्मात् परतरं नान्यत् किञ्चिदस्ति ?

(४) कीदृशानां भक्तानां पापं त्वन्तगतम्?

(५) सप्तमाध्याये कति श्लोकास्सन्ति ?

(६) आब्रह्मभुवनाल्लोकाः कीदृशाः सन्ति ?

(७) चतुर्युगसहस्रावसानं कस्य अहः अस्ति ?

(८) कर्मवश्यो भूतग्रामः कदा प्रभवति कदा च प्रलीयते ?

(९) सर्वेषु भूतेषु नश्यत्सु कः न विनश्यति?

(१०) कया गतिना अनावृत्तिं यान्ति ?

(११) तिस्रः विद्याः काः ?

(१२) क्षीणे पुण्ये कुत्र विशन्ति स्वर्गसुखासक्ताः जनाः ?

(१३) शरीरं नित्यं वानित्यम् अस्ति ?

(१४) सर्वयज्ञानां भोक्ता कः ?

(१५) राजविद्याराजगुह्ययोगः कस्मिन्नध्याये वर्णितः ?

***